M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.

Ser. 7/1

Title: Shishupala Vadha

711

शिशुपाल वधः Incomplete

Shishupāla Vadha	Title
Māgha	Author
	Editor
	Year, Vols.
	Publisher
711	Remarks

श्रीगणेशायनमः॥ श्रियः पतिः श्रीमति शासितुं जगज्जगन्निवासो वसुदेवसद्मनि॥ वस
न्ददर्शावतरंमतंबराद्धिरण्यगर्भांगभुवं मुनिं हरिः १ द्विधा कृतात्मा किमयं दिवा
करो विधूमरोचिः किमयं कृताशनः॥ गतं तिरश्चीनमनूरुसारथेः प्रसिद्धमूर्ध्वज्वल
नं हविर्भुजः॥ पतत्यधो धाम विसारि सर्वतः किमेतदित्याकुलमीक्षितं जनैः २
चयस्त्विषामित्यवधारितं पुरा ततः शरीरीति विभाविताकृतिं विभुर्विभक्तावयवं पुमा
भो निति क्रमादमुं नारद इत्यबोधि सः ३ नवानधोधो बृहतः पयोधरान्समूढकर्पूरपरागपा
डुरं॥ क्षणं क्षणोत्क्षिप्तगजेंद्रकृत्तिनास्फुटोपमं भूतिसितेन शंभुना ४ दधानमंभोरु
हकेसरद्युतीर्जटाः शरच्चंद्रमरीचिरोचिषं॥ विपाकपिंगास्तुहिनस्थलीरुहो धराध
रेंद्रं व्रततीततीरिव ५ पिशंगमौंजीयुजमर्जुनच्छविं वसानमेणाजिनमंजनद्युति॥
सुवर्णसूत्राकलिताधरांबरां विडंबयंतं शितिवाससस्तनुं ६ विहंगराजांगरुहैरिवा
यतैर्हिरण्मयोर्वीरुहवल्लितंतुभिः॥ कृतोपवीतं हिममशुभ्रमुच्चकैर्घनं घनांते तडितां गुणै
रिव॥७॥
० यद्धितुमनलिनेन खमरः ... भूमिर्भसिन भस्मनि

प्रवेण्यास्तरणं वर्णः परिस्तोमः कुथो द्वयोरित्यमरः स्वरसप्तकसमूहो ग्रामः तद्विशेषः पड्जादिः परस्परेभ्यः स्वरसंघाः

माघ स० १ निसर्गचित्रोज्ज्वलसूक्ष्मपक्ष्मणा लसद्बिसच्छेदसितांगसंगिना ॥ चकासतं चारुचमूरुचर्मणा कुथेन नागेंद्रमिवेंद्रवाहनं ८ अजस्रमास्फालितवल्लकीगुणक्षतोज्ज्वलांगुष्ठनखांशुभिन्नया ॥ पुरः प्रवालैरिव पूरितार्धया विभांतमच्छस्फटिकाक्षमालया ९ रणद्भिराघट्टनया नभस्वतः पृथग्विभिन्नश्रुतिमंडलैः स्वरैः ॥ स्फुटीभवद्ग्रामविशेषमूर्छनामवेक्ष्यमाणं महतीं मुहुर्मुहुः ॥ १० ॥ निवर्त्य सोनुव्रजतः कृतानतीनतींद्रियज्ञाननिधिर्नभःसदः ॥ समाससाद सादितदैत्यसंपदः पदं महेंद्रालय चारु चक्रिणः ॥ ११ ॥ पतत्पतंगप्रतिमस्तपोनिधिः पुरोस्य यावन्न भुवि व्यलीयत ॥ गिरेस्तडित्वानिव तावदुच्चकैर्जवेन पीठादुदतिष्ठदच्युतः १२ अथ प्रयत्नोन्नमितानमत्फणैर्धृते कथंचित्फणिनां गणेश्वरैः ॥ न्यधायिषातामभिदेवकीसुतं सुतेन धातुश्चरणौ भुवस्तले १३ तमर्घ्यमर्घ्यादिकयादिपूरुषः सपर्यया साधु स पर्यपूपुजत् ॥ गृहानुपैतुं प्रणयादभीप्सवो भवंति नापुण्यकृतां मनीषिणः १४ प्रथमं नवर्णनाद्यनुभूयते द्विस्वमात्रकः ॥ सा श्रुतिः संपरिज्ञेया स्वरावयवलक्षणा ॥ अंतरं भावीयस्तिन्नो नुरणनात्मकः ॥ स्वतो रंजयति श्रोतृश्रुतिः सा स्वर उच्यते

आरोहावरोहक्रमभेदः

नयावदेतावुदपश्यदुत्थितो जनस्तुषारांजनपर्वताविव ॥ स्वहस्तदत्ते मुनिमासने मुनिश्चिरं तनस्तावदभिन्यवीविशत् १५ महामहानीलशिलारुचः पुरो निषेदिवान्कंसकृषः स विष्टरे ॥ श्रितोदयाद्रेरभिसायमुच्चकैरचूचुरच्चंद्रमसोभिरामतां १६ विधाय तस्यापचितिं प्रसेदुषः प्रकाममप्रीयत यज्वनां प्रियः ॥ ग्रहीतुमार्यान्परिचर्यया मुहुर्महानुभावा हि नितांतमर्थिनः १७ अशेषतीर्थोपहृताः कमंडलोर्निधाय पाणावृषिणाभ्युदीरिताः ॥ अघौघविध्वंसविधौ पटीयसीर्नतेन मूर्ध्ना हरिरग्रहीदपः १८ स कांचने यत्र मुनेरनुज्ञया नवांबुदश्यामवपुर्न्यविक्षत ॥ जिगाय जंबूजनितश्रियः श्रियं सुमेरुशृंगस्य तदा तदासनं १९ स तप्तकार्तस्वरभास्वरांबरः कठोरताराधिपलांछनच्छविः ॥ विदिद्युते वाडवजातवेदसः शिखाभिराश्लिष्ट इवांभसां निधिः २० रथांगपाणेः पटलेन रोचिषामृषित्विषः संवलिता विरेजिरे ॥ चलत्पलाशांतरगोचरास्तरोस्तुषारमूर्तेरिव नक्तमंशवः २१ प्रफुल्लतापिच्छनिभैरभीषुभिः शुभैश्च सप्तच्छदपांशुपांडुभिः ॥

पुष्पाकीर्ण ... नील ... वृक्षविशेषः

आत्मनुपसीह्रि

मा-स-१ परस्परेणच्छुरितामलच्छवी तदेकवर्णाविव तौ बभूवतुः २२ युगांतकालप्रति
अतिछन संहृतात्मनो जगंति यस्यां सविकासमासत ॥ तनौ ममुस्तत्र न कैटभद्विषस्तपोध
२ नाभ्यागमसंभवा मुदः २३ निदाघधामानमिवाधिदीधितिं मुदा विकासं मुनि
मभ्युपेयुषी ॥ विलोचने बिभ्रदधिश्रितश्रिणी स पुंडरीकाक्ष इति स्फुटोभवत् २४
सितं सितिम्ना सुतरां मुनेर्वपुर्विसारिभिः सौधमिवाथ लंभयन् ॥ द्विजावलिव्या
जनिशाकरांशुभिः शुचिस्मितां वाचमवोचदच्युतः २५ हरत्यघं संप्रति हेतुरेष्य
तः शुभस्य पूर्वाचरितैः कृतं शुभैः ॥ शरीरभाजां भवदीयदर्शनं व्यनक्ति काल
त्रितयेपि योग्यतां २६ जगत्यपर्याप्तसहस्रभानुना न यन्नियंतुं समभावि भा
नुना ॥ प्रसह्य तेजोभिरसंख्यतां गतैरदस्त्वया नुन्नमनुत्तमं तमः २७ कृतः प्र
जाक्षेमकृता प्रजासृजा सुपात्रनिक्षेपनिराकुलात्मना ॥ सदोपयोगेपि गुरुस्त्व
जौ

मक्षयो निधिः श्रुतीनां धनसंपदामिव २८ विलोकनेनैव तवामुना मुने कृतः
कृतार्थोस्मि निबर्हितांहसा ॥ तथापि शुश्रूषुरहं गरीयसीर्गिरोथवा श्रेय
सि केन तृप्यते २९ गतस्पृहोप्यागमनप्रयोजनं वदेति वक्तुं व्यवसीयते
यया ॥ तनोति नस्तां मुदितात्मगौरवो गुरुस्तवैवागम एष धृष्टतां ॥ ३०
इति ब्रुवंतं तमुवाच स व्रती न वाच्यमित्थं पुरुषोत्तम त्वया ॥ त्वमेव साक्षा
त्करणीय इत्यतः किमस्ति कार्यं गुरु योगिनामपि ३१ उदीर्णरागप्रति
अनैभ्यमसै रोधकं जनैरभीक्ष्णमक्षुण्णतयातिदुर्गमं ॥ उपेयुषो मोक्षपथं मनस्विनस्त्वदग्रभूमि
ह्री निरपायसंश्रया ३२ उदासितारं निगृहीतमानसैर्गृहीतमध्यात्मदृशा कथंचन ॥ बहि
र्विकारं प्रकृतेः पृथग्विदुः पुरातनं त्वां पुरुषं पुराविदः ३३ निवेशयामासिथ हेल
योद्धृतं फणाभृतां छादनमेकमोकसः ॥ जगत्त्रयैकस्थपतिस्त्वमुच्चकैरहीश्वरस्तं

मा॰स॰१ भाशिरः स्फुभूतलं ३४ अनन्यगुर्व्यास्तवकेनकेवलं पुराणमूर्तेर्महिमावगम्यते॥ मनुष्य
जन्मापिस्फुरास्फुरान्गुणैर्भवान्भवोच्छेदकरैः करोत्यधः ३५ लघूकरिष्यन्नतिभारभं
गुरामममुंकिलत्वंत्रिदिवादवातरः॥ उदूढलोकत्रितयेनसांप्रतंगुरुर्धरित्रीक्रियते
२ तरांत्वया॥ ३६ निजौजसोज्जासयितुंजगद्रुहामुपाजिहीथानमहीतलंयदि॥ समा
हितैरप्यनिरूपितस्ततः पदंदृशास्याः कुथमीशमादृशां ३७ उपप्लुतंपातुमदोमदोक्षते
स्त्वमेवविश्वंभरविश्वमीशिषे॥ सतेवैरःक्षालयितुंक्षमेतकः क्षपातमस्काण्डमली
मसंनभः ३८ करोतिकंसादिमहीभृतांवधाज्जनोमृगाणामिवयरत्तनस्तवं॥ हेरीहै
रण्याक्षपुरःसरास्फुराद्विपाद्विषः प्रत्यकलसातिरक्रिया ३९ प्रवृत्तएवस्वयमुज्झितः
श्रमः क्रमेणपेष्टुंभुवनद्विषामसि॥ तथापिवाचालतयायुनक्तिमांमिथस्त्वदाभाष
णलोलुपंमनः ४० तदिंद्रसंदिष्टमुपेंद्रयद्वचः क्षणंमयाविश्वजनीनमुच्यते॥ समस्त
कार्येषुगतेनधुर्यतांमहासुहृद्वः स्तद्भवतानिशम्यतां ४१ अभूदभूमिः प्रतिपक्षजन्म

नांभियांतनूजस्तपनद्युतिर्दितेः॥ यमिंद्रशब्दार्थनिषूदनंहरेर्हिरण्यपूर्वंकशिपुंप्रच
क्षते ४२ समत्सरेणास्फुर इत्युपेयुषाचिरायनाम्नाप्रथमाभिधेयतां॥ भयस्यपू
र्वावतरस्तरस्विनामनः स्फुयेनद्युसदांन्यधीयत ४३ दिशामधीशांश्चतुरोयतः
स्फुरानपास्यनलगद्दताः श्रियाविरे॥ अवापुरारभ्यततश्चलाशतिप्रवादमुच्चैरय
शस्करंश्रियः ४४ पुराणिदुर्गाणिनिशातमायुधंबलानिशूराणिघनाश्च
५ कंचुकाः॥ स्वरूपशोभैकफलानिनाकिनांगणैर्यमात्रांक्यतदादिचक्रिरे ४५
ससंचरिष्णुर्भुवनांतरेषुयांयदृच्छयाशिश्रियदाश्रयः श्रियां॥ अकारितस्यैमुकु
टोपलस्खलत्करैस्त्रिसंध्यंत्रिदशैर्दिशेनमः ४६ सटाच्छटाभिन्नघनेनबिभ्रता
नृसिंहसैंहीमतनुंतनुंत्वया॥ समुग्धकांतास्तनसंगभंगुरैरुरोविदारंप्रतिचस्क
रेनखैः ४७ विनोदमिच्छन्नयदर्पजन्मनोरणेनकंड्वास्वदृशोः समंपुनः॥

प्र लुप्तकारिणीति क्रियमाणार्थं नाविनाके ग्रहणं

मा॰ स॰ १ स रावणो नाम निकामभीषणं बभूव रक्षः क्षतरक्षणं दिवः ४८ प्रभुर्बुभूषु
र्भुवनत्रयस्य यः शिरोतिरागाद्दशमं चिकर्तिषुः ॥ अतर्कयद्विघ्नमिवेष्टसा
हसः प्रसादमिच्छासदृशं पिनाकिनः ४९ समुत्क्षिपन्यः पृथिवीभृतां वरं
४ वरप्रदानस्य चकार शूलिनः ॥ त्रसत्तुषाराद्रिसुतससंभ्रमस्वयंग्रहाश्लेषसुखेन नि नासः
ष्क्रयं ५० पुरीमवस्कंद लुनीहि नंदनं मुषाण रत्नानि हरामरांगनाः ॥ विगृह्य च
क्रे नमुचिद्विषा बली य इत्थमस्वास्थ्यमहर्निशं दिवः ५१ सलीलयातानि न भर्तु
पदे रभ्रमोर्न चित्रमुच्चैःश्रवसः पदक्रमं ॥ अनुद्रुतः संयति येन केवलं बलस्य शत्रुः
प्रशशंस शीघ्रतां ५२ अशक्नुवन्सोढुमधीरलोचनः सहस्ररश्मेरिव यस्य
विक्रमं ॥ प्रविश्य हेमाद्रि~~[illegible]~~गुहागृहांतरं निनाय बिभ्यद्दिवसा
नि कौशिकः ५३ बृहच्छिलानिष्ठुरकंठघट्टनाद्विकीर्णलोलाग्निकणं सुरद्विषः ॥
लो

अनभिभावुक

जगत्प्रभोरप्रसहिष्णु वैष्णवं न चक्रमस्याक्रमताधिकंधरं ५४ विभिन्नशंखः कलुषी
भवन्मुहुर्मदेन दंतीव मनुष्यधर्मिणः ॥ निरस्तगांभीर्यमपास्तपुष्पकं प्रकंपयामास
न मानसन्न सः ५५ रणेषु तस्य प्रहिताः प्रचेतसा सरोषहुंकारपराङ्मुखीकृताः ॥
प्रहर्तुरेवोरगराजरज्जवो जवेन कंठं सभयाः प्रपेदिरे ५६ परेतभर्तुर्महिषो
मुनाधनुर्विधातुमुत्खातविषाणमंडलः ॥ हृतेपि भारे महतस्त्रपाभराद्उवाह
दुःखेन भृशानतं शिरः ५७ स्पृशन्सशंकः समये शुचावपि स्थितः करागैरसमग्रपातिभिः ॥
अघर्मघर्मोदकबिंदुमौक्तिकैरलंचकारास्य वधूरहस्करः ५८ कलासमग्रेण गृहानमुंचता
मनस्विनीरुत्कयितुं पटीयसा ॥ विलासिनस्तस्य वितन्वता रतिं न नर्मसाचिव्यमकारि नेंदुना ५९ न
विलासिनीविभ्रमदंतपत्रिकाविधित्सया नूनमनेन मानिना ॥ न जातु वैनायकमेकमुद्धृतं विषाणमद्यापि पुनः प्ररोहति ६० निशांतनारीपरिधाननस्फुठागसा भूरुषु लोलचक्षुषः ॥
त्रियेण तस्यानपराधबाधिताः प्रकंपनेनानुचकंपिरे सुराः ६१ निरस्तस्तस्य ज [illegible]
प्ते

नाभिभाविनामुकुमोदिम्नाम ह्रसां महीयसां॥ बभार बाष्पैर्द्विगुणीकृतं तनुस्तनूनपाद्धूमवितानं
शि·मा·स१ माधिजैः ६२ परस्य मर्माविधमुझतां निजं द्विजिह्वतादोषमजिह्मगामिभिः॥ तमिध्ममारोप
यितुं सकर्णके गणैर्नभेजे फणिनां भुजंगता ६३ तदीयमातंगघटाविघट्टितैः कटस्थलप्रो
५ षितदानवारिभिः॥ गृहीतदिक्कैरपुनर्निवर्तिभिश्चिरस्य याथार्थ्यमलंभि दिग्गजैः ६४ अ
भीक्ष्णमुष्णैरपि तस्य सोष्मणः सुरेंद्रबंदीश्वसितानिलैर्यथा॥ सचंदनांभःकणकोमलै
स्तथा वपुर्जलार्द्रापवनैर्न निर्ववौ ६५ तपनवर्षाः शरदाहिमागमो वसंतलक्ष्म्या शिशि
रः समेत्य च॥ प्रसूनकॢप्तिं दधतः सदर्तवः पुरेस्य वास्तव्यकुटुंबितां ययुः ६६ अमानवं
जातमजं कुले मनोः प्रभाविनं भाविनमंतमात्मनः॥ मुमोच जानन्नपि जानकीं न यः स
दाभिमानैकधना हि मानिनः ६७ स्मरस्यदो दाशरथिर्भवन्भवानमुं वनांताद्वनिताप
हारिणं॥ पयोधिमाविध्यचलज्जलाविलं विलंघ्य लंकां निकषा हनिष्यति ६८ अथो
पपत्तिं छलनापरोपरामवाप्य शैलूष इवैष भूमिकां॥ तिरोहितात्मा शिशुपालसंज्ञया

प्रतीयते संप्रति सोप्यसः परैः ६९ स बाल आसीद्वपुषा चतुर्भुजो मुखेन पूर्णेंदुनिभस्त्रिलो
चनः॥ युवा कराक्रांतमहीभृदुच्चकैरसंशयं संप्रति तेजसा रविः ७० स्वयं विधातासुरदैत्य
रक्षसामनुग्रहावग्रहयोर्यदृच्छया॥ दशाननादीनभिराध्यदेवता वितीर्णवीर्यातिशयान्हस
त्यसौ ७१ बलावलेपादधुनापि पूर्ववत्प्रबाध्यते तेन जगज्जिगीषुणा॥ सतीव योषित्प्र
कृतिः सुनिश्चला पुमांसमभ्येति भवांतरेष्वपि ७२ तदेनमुल्लंघितशासनं विधेर्विधेहि
कीनाशनिकेतनातिथिं॥ शुभेतराचारविपक्त्रिमापदो निपादनीया हि सतामसाधवः ७३
हृदयमरिवधोदयादुपोढद्रढिम दधातु पुनः पुरंदरस्य॥ घनपुलकपुलोमजाकुचाग्र
द्रुत७परिरंभनिपीडनक्षमत्वं ७४ ओमित्युक्तवतोथ शार्ङ्गिण इति व्याहृत्य वाचं नभ
स्तस्मिन्नुत्पतिते पुरः सुरमुनाविंदोः श्रियं बिभ्रति॥ शत्रूणामनिशं विनाशपिशु
नः कर्तुमतिसंयति व्योम्नीव भ्रुकुटीछलेन वदने केतुश्चकारास्पदं ७५ इति श्रीशिशुपा
लवधे महाकाव्ये बालक्रीमाघकृतौ नाद्दिवरणे भट्टश्रीवल्लभविरचितायां श्रीकृष्णना
रदमुनिसमागमप्रतिपत्तिवर्णनो नाम प्रथमः सर्गः॥ ॥७॥ ॥श्रीः॥ ॥

मा०स०२ यियक्षमाणेनाहूतः पार्थेनाथ द्विषन्मुरं॥ अभिचैद्यं प्रतिष्ठासुरासीत्कार्यद्वयाकुलः १
गुरुकाव्यानुगां बिभ्रच्चांद्रीमभिनभः श्रियं॥ सार्धमुद्धवसीरिभ्यामथासावासदत्स
दः २ जाज्वल्यमाना जगतः शांतये समुपेयुषी॥ व्यद्योतिष्ट सभावेद्यामसौ नरशि
६ खित्रयी ३ रत्नस्तंभेषु संक्रांतप्रतिमास्ते चकाशिरे॥ एकाकिनोपि परितः पौरु
षेयवृता इव ४ अध्यासामासुरुत्तुंगहेमपीठानि यान्यमी॥ तैरूहे केसरिक्रांतत्रि
कूटशिखरोपमा ५ गुरुद्वयाय गुरुणोरुभयोरथ कार्ययोः॥ हरिर्विप्रतिषेधं तमा
चचक्षे विचक्षणः ६ द्योतितांतःसभैः कुंदकुड्मलाग्रदतः स्मितैः॥ स्नपितेवाभ
वत्तस्य शुद्धवर्णा सरस्वती ७ भवद्गिरामवसरप्रदानाय वचांसि नः॥ पूर्वरंगः प्र
मा संगाय नाटकीयस्य वस्तुनः ८ करदीकृतभूपालो भ्रातृभिर्जित्वरैर्दिशां॥ विनाप्यस्मद
लंभूष्णुरिज्यायै तपसः सुतः ९ उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता॥ समौ हि शि
ष्टैराम्नातौ वर्त्स्यंतावामयः स च १० न दूये सात्वतीसूनुर्यन्मह्यमपराध्यति॥ यत्तु दंदह्यते
लोकमदो दुःखाकरोति मां ११

मा

मम तावन्मतमिदं श्रूयतामंग वामपि॥ ज्ञातसारोपि खल्वेकः संदिग्धे कार्यवस्तुनि १२
यावदर्थपदां वाचमेवमादाय माधवः॥ विरराम महीयांसः प्रकृत्या मितभाषिणः १३
ततः सपत्नापनयस्मरणानुशयस्फुरा॥ ओष्ठेन रामो रामोष्ठबिंबचुंबनचुंचुना १४॥
विवक्षितामर्थविदस्तत्क्षणप्रतिसंहृतां॥ प्रापयन्पवनव्याधेर्गिरमुत्तरपक्षतां १५
घूर्णयन्मदिरास्वादमदपाटलितद्युती॥ रेवतीवदनोच्छिष्टपरिपूतपुटे दृशौ १६ आ
श्लेषलोलुपवधूस्तनकार्कश्यसाक्षिणीं॥ म्लापयन्नभिमानोष्णैर्वनमालां मुखानिलैः १७
दधत्संध्यारुणव्योमस्फुरत्तारानुकारिणीः॥ द्विषद्द्वेषोपरक्तांगसंगिनीः स्वेदविप्रुषः १८
प्रोल्लसत्कुंडलप्रोतपद्मरागदलत्विषा॥ कृष्णोत्तरासंगरुचं विदधच्चौतपल्लवीं १९
ककुद्मिकन्यावक्त्रांतर्वासलब्धाधिवासया॥ मुखामोदं मदिरया कृतानुव्याधमुद्वमन् २०
जगाद वदनच्छद्मपद्मपर्यंतपातिनः॥ नयन्मधुलिहः श्वैत्यमुदग्रदशनांशुभिः २१ अष्टभिः कुलकं॥
यद्वासुदेवेनादीनमनादीनवमीरितं॥ वचसस्तस्य सपदि क्रिया केवलमुत्तरं २२॥

मा॰स॰ २ नैतल्लघ्वपि भूयस्या वचो वाचातिशय्यते ॥ इंधनौघधगप्यग्निस्त्विषा नात्येति पूषणं २३
संक्षिप्तस्याप्यतोस्यैव वाक्यस्यार्थगरीयसः ॥ सुविस्तरतरा वाचो भाष्यभूता भवंतु मे २४
विरोधिवचसो मूकान्वागीशानपि कुर्वते ॥ जडानप्यनुलोमार्थान्प्रवाचः कृतिनो गिरः २५
षड्गुणाः शक्तयस्तिस्रः सिद्धयश्चोदयास्त्रयः ॥ ग्रंथानधीत्य व्याकर्तुमिति दुर्मेधसोप्यलं २६
अनिर्लोडितकार्यस्य वाग्जालं वाग्मिनो वृथा ॥ निमित्तादपराद्धेषोर्धानुष्कस्येव
वल्गितं २७ सर्वकार्यशरीरेषु मुक्त्वांगस्कंधपंचकं ॥ सौगतानामिवात्मान्यो
नास्ति मंत्रो महीभृतां २८ मंत्रो योध इवाधीरः सर्वांगैः संवृतैरपि ॥ चिरं न सहते
स्थातुं परेभ्यो भेदशंकया २९ संपदा सुस्थिरंमन्यो भवति स्वल्पयापि यः ॥ कृतकृत्यो
विधिर्मन्ये न वर्धयति तस्य तां ३० आत्मोदयः परज्यानिर्द्वयं नीतिरितीयती ॥ तदूरीकृ

~~[illegible]पयुक्तापि सर्वैर्मंत्रैः संहतैरपि ॥ चिरं न सहते [illegible]रेभ्यो भेदशंकया~~ २=८८
त्य कृतिभिर्वाचस्पत्यं प्रतायते ३१ तृप्तियोगः परेणापि महिम्ना न महात्मनां ॥ पूर्णश्चंद्रोद
यकांक्षी दृष्टांतोत्र महार्णवः ३२ संभूयघातमश्रांतः परान्योद्धासि नः ॥ प्रध्वंसितांधतम
सस्तत्रोदाहरणं रविः ३३ विपक्षमखिलीकृत्य प्रतिष्ठा खलु दुर्लभा ॥ अनीत्वा पंकतां धू
लिमुदकं नावतिष्ठते ३४ ध्रियते यावदेकोपि रिपुस्तावत्कुतः सुखं ॥ पुरः क्लिश्नाति सो
मं हि सैंहिकेयोसुरद्रुहां ३५ सखा गरीयान्शत्रुश्च कृत्रिमस्तौ हि कार्यतः ॥ स्यातामभि
त्रौ मित्रे च सहजप्राकृतावपि ३६ उपकर्त्रारिणा संधिर्न मित्रेणापकारिणा ॥ उपकारा
पकारौ हि लक्ष्यं लक्षणमेतयोः ३७ त्वया विप्रकृतश्चैद्यो रुक्मिणीं हरता हरे ॥ ब
द्धमूलस्य मूलं हि महद्वैरतरोः स्त्रियः ३८ त्वयि भौमं गते जेतुमरौत्सीत्स पुरीमिमां ॥
प्रोषितार्यमणं मेरोरंधकारस्तटीमिव ३९ आलप्यालमिदं बभ्रोर्यत्स दारानपाहरत् ॥ कथा
पि खलु पापानामलमश्रेयसे यतः ४० विराद्ध एवं भवता विराद्धा बहुधा च नः ॥ निर्वर्त्यतेरिः क्रिय

भवता

मा.स.२ यास्मभृतः श्रवसः स्तनः ४१ विधाय वैरं सामर्षे नरोरौ य उदासते ॥ प्रक्षिप्योदर्चिषं क
क्षे शेरते तेभिमारुतं ४२ मनागनभ्यावृत्त्या वा कामं क्षाम्यतु यः क्षमी ॥ क्रियासमभि
८ हारेण विराध्यंतं सहेत कः ४३ अन्यदा भूषणं पुंसः क्षमा लज्जेव योषितः ॥ पराक्रमः
परिभवे वैयात्यं सुरतेष्विव ४४ मा जीवन्यः परावज्ञादुःखदग्धोपि जीवति ॥ तस्या
जननिरेवास्तु जननीक्लेशकारिणः ४५ पादाहतं यदुत्थाय मूर्धानमधिरोहति ॥
स्वस्थादेवापमानेपि देहिनस्तद्वरं रजः ४६ असंपादयतः कंचिदर्थं जातिक्रिया
गुणैः ॥ यदृच्छाशब्दवत्पुंसः संज्ञायै जन्म केवलं ४७ तुंगत्वमितरा नाद्रौ नेदं सिंधाव
ध गाधता ॥ अलंघनीयताहेतुरुभयं तन्मनस्विनि ४८ तुल्येपराधे स्वर्भानुर्भानुमंतं चिरेण यत् ॥
न हिमांशुमाशु ग्रसते तन्म्रदिम्नः स्फुटं फलं ४९ स्वयं प्रणमतेल्पेपि परवायावुपेयुषि ॥ निद
र्शनमसाराणां लघुर्बहुतृणं नरः ५० तेजस्विमध्ये तेजस्वी दवीयानपि गण्यते ॥ पंचमः पंच
तपसस्तपनो जातवेदसां ५१ अकृत्वा हेलया पादमुच्चैर्मूर्धसु विद्विषां ॥ कथंका
रमनालंबा कीर्तिर्द्यामधिरोहति ५२ अंकाधिरोपितमृगश्चंद्रमा मृगलांछनः ॥ केसरी नि

ष्ठुरक्षिप्तमृगयूथो मृगाधिपः ५३ चतुर्थोपायसाध्ये तु रिपौ सांत्वमपक्रिया ॥ स्वेद्यमामज्वरं
प्राज्ञः कोंभसा परिषिंचति ५४ सामवादाः सकोपस्य तस्य प्रत्युत दीपकाः ॥ प्रतप्त
स्येव सहसा सर्पिषस्तोयबिंदवः ५५ गुणानामायथातथ्यादर्थं विप्लावयंति ये ॥ अ
मात्यव्यंजना राज्ञां दूष्यास्ते शत्रुसंज्ञिताः ५६ स्वशक्त्युपचये केचित्परस्य व्यस
नेपरे ॥ यानमाहुरुदासीनं त्वामुत्थापयति द्वयं ५७ लिलंघयिषतो लोकान्
अलंघ्यानलघीयसः ॥ यादवांभोनिधीन्रुंधे वेलेव भवतः क्षमा ५८ विज
यस्त्वयि सेनायाः साक्षिमात्रेपदिश्यतां ॥ फलभाजि समीक्ष्योक्ते बुद्धेर्भोग इवात्मनि ५८
हते हिडिंबरिपुणा राज्ञि द्वैमातुरे युधि ॥ चिरस्य मित्रव्यसनी सुदमो दमघोषजः ६०
भारतीमाहितभरामथानुद्धतमुद्धवः ॥ तथ्यामुतथ्यानुजवज्जगादाग्रे गदाग्रजं ६१
संप्रत्यसांप्रतं वक्तुमुक्ते मुसलपाणिना ॥

मा-स-२ नीतिरापदि यद्गम्यः परस्तन्मानिनो ह्रिये ॥ विधुर्विधुंतुदस्येव पूर्णस्तस्योत्सवाय
सः ६१ अन्यदुच्छृंखलं सत्वमन्यत् शास्त्रनियंत्रितं ॥ सामानाधिकरण्यं
हि तेजस्तिमिरयोः कुतः ६२ इंद्रप्रस्थगमस्तावत्कारि मा संतु चेदयः ॥ आस्माकदं
तिसान्निध्याद्वामनीभूतभूरुहः ६३ निरुद्धवीवधासारप्रसारां गा इव व्रजं ॥ उपरुंधंतु दाशा
र्हीः पुरीं माहिष्मतीं द्विषः ६४ यजतां पांडवः स्वर्गमवत्विंद्रस्तपत्विनः ॥ वयं हनाम द्विषतः
सर्वः स्वार्थं समीहते ६५ प्राप्यतां विद्युतां संपत् संपर्कादर्करोचिषां ॥ शस्त्रैर्द्विषच्छिरश्छेद
प्रोच्छलच्छोणितोक्षितैः ६६ इति संरंभिणो वाणीर्बलस्यालेख्यदेवताः ॥ सभाभित्तिप्रति
ध्वानैर्भयादन्ववदन्निव ६७ निशम्य ताः शेषगवीरभिधातुमधोक्षजः ॥ शिष्याय बृहतां पत्युः
प्रस्तावमदिशत् दृशा ६८ भारतीमाहितभरामथानुद्धतमुद्धवः ॥ तथ्यामुतथ्यानुजवज्ज
गादाग्रे गदाग्रजं ६९ संप्रत्यसांप्रतं वक्तुमुक्ते मुसलपाणिना ॥ निर्धारितेऽर्थे लेखेन ख
लूक्त्वा खलु वाचिकं ७० न तथापि यन्मय्यपि ते गुरुरित्यस्ति गौरवं ॥ तन्म योजककर्त्तं लघु

पीतिवममल्पतः ७१ क्षौणीः कतिपयैर्व्यथिनस्थलैरिव ॥ अनंगनाबाद्धलस्याहोगायस्येव विचि
त्रता ७२ बाह्मपिस्वेघ्याकासंप्रकीर्णमभिधीयते ॥ अनुज्झितार्थसंबंधः प्रबंधो दुरुदाहरः
७३ गरीयसीमपि घनामनल्पगुणकल्पितां ॥ विस्तारयंति निपुणाश्चेवं वाचेपटीमिव
७४ विशेषविदुषः शास्त्रं यत्त्वोद्ग्राह्यते पुरः ॥ हेतुः परिचयस्थैर्ये वक्तुर्गुणनिकैव सा ७५
न लोकोत्साहावत्स्वामीयतेता धातुमात्मनि ॥ नाहिमूलमुद्दस्यंत्याग जिगीषोरात्मसंपदः
७६ सोपधानां धियं धीराः स्थेयसीं खट्वयंति ये ॥ तत्रानिशं निषण्णास्ते जानते जातु न
श्रमं ७७ स्पृशंति शरवत्तीक्ष्णाः स्तोकमंतर्विशंति च ॥ बहुस्पृशापि स्थूलेन स्थीयते
बहिरश्मवत् ७८ आरभंतेऽल्पमेवाज्ञाः कामं व्यग्रा भवंति च ॥ महारंभाः कृतधियस्ति
ष्ठंति च निराकुलाः ७९ उपायमास्थितस्यापि नश्यंत्यर्थाः प्रमाद्यतः ॥ हंति नो
पशयस्थोऽपि शयालुर्मृगयुर्मृगान् ८० उदेतुमत्यजन्नीहां राजसु द्वादशस्वपि ॥ जि
गीषुरेको दिनकृदादित्येष्विव कल्पते ८१ बुद्धिशस्त्रः प्रकृत्यंगो घनसंवृत्तिकंचुकः
चारेक्षणो दूतमुखः पुरुषः कोऽपि पार्थिवः ८२

नेत्रः क्षमावानेकांतः कालज्ञस्य महीपतेः ॥ नैकमोजः प्रसादो वा रसभावविदः कवेः ८३
कृतापचारोऽपि परैरनाविष्कृतविक्रियः ॥ असाध्यः कुरुते कोपं प्राप्ते काले गदो यथा ८४
मृदुव्यवहितं तेजो भोक्तुमर्थान् प्रकल्पते ॥ प्रदीपः स्नेहमादत्ते दशयाभ्यंतरस्थया ८५
नालंबते दैष्टिकतां न निषीदति पौरुषे ॥ शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते ८६
स्थायिनोऽर्थे प्रवर्तंते भावाः संचारिणो यथा ॥ रसस्यैकस्य भूयांसस्तथा नेतुर्महीभृतः ८७
तंत्रावापविदा योगैर्मंडलान्यधितिष्ठता ॥ सुनिग्रहा नरेंद्रेण फणींद्रा इव शत्रवः ८८
करप्रचेयामुत्तुंगः प्रभुशक्तिं प्रथीयसीं ॥ प्रज्ञाबलबृहन्मूलः फलत्युत्साहपादपः ८९
अनल्पत्वात्प्रधानत्वाद्वंशस्येवेतरे स्वराः ॥ विजिगीषोर्नृपतयः प्रयांति परिवारतां ९० ॥
ता: अप्यनारभमाणस्य विभोरुत्पादिताः परैः ॥ व्रजंति गुणतामर्थाः शब्दा इव विहायसः ९१
यातव्यपार्ष्णिग्राहादिमालायामधिकद्युतिः ॥ एकार्थतंतुप्रोतायां नायको नायकायते ९२
षाड्गुण्यमुपयुंजीत शक्त्यपेक्षो रसायनं ॥ भवंत्यस्यैवमंगानि स्थास्नूनि बलवंति च ९३

मा.स२ स्थानेशमवतांशक्त्याव्यायामेवृद्धिरंगिनां॥ अयथाबलमारंभोनिदानंक्षयसंपदः ९४ तदी
शितारंचेदीनांभवांस्तमवमंस्तमा॥ निहंत्यरीनेकपदेयउदात्तस्वरानिव ९५ मावेदियद
११ सावेकोजेतव्यश्चेदिराडिति॥ राजयक्ष्मेवरोगाणांसमूहःसमहीभुजां ९६ संपादितफ
लस्तेनसपक्षःपरभेदकः॥ कार्मुकेनेवगुणिनाबाणःसंधानमेष्यति ९७ येचान्येकाल
यवनशाल्वरुक्मिद्रुमादयः॥ तमस्वभावास्तेप्येनंप्रदोषमनुयायिनः ९८ उपजापःकृत
स्तेनतानाकोपवतस्त्वयि॥ आशुदीपयितात्पोपिसाग्नीनेधानिवानिलः ९९ बृहत्सहा
यःकार्यांतंक्षोदीयानपिगच्छति॥ संभूयांभोधिमभ्येतिमहानद्यानगापगा १०० तस्यमि
त्राण्यमित्रास्तेयेचयेचोभयेनृपाः॥ अभियुक्तंत्वयैनंतेगंतारस्त्वामतोपरे १०१ मखवि
मखविघ्नायसकलमित्थमुत्थाप्यराजकं॥ हंतजातमजातारेःप्रथमेनत्वयारिणा १०२ संभा
व्यत्वामतिभरक्षमस्कंधंसबांधवः॥ सहायमध्वरधुरंधर्मराजोविवक्षते १०३ महात्मा
नोनुगृह्णंतिभजमानान्रिपूनपि॥ सपत्नीप्रापयंत्यब्धिंसिंधवोनगनिम्नगाः १०४

चिरादपिबलात्कारोबलिनःसिद्धयेरिषु॥ छंदानुवृत्तिदुःसाध्याःसुहृदोविमनीकृताः
१०५ मन्यसेरिवधःश्रेयान्प्रीतयेनाकिनामपि॥ पुरोडाशभुजामिष्टमिष्टंक
र्तुमलंतरां १०६ अमृतंनामयत्संतोमंत्रजिह्वेषुजुह्वति॥ शोभैवमंदरक्षुब्ध
क्षुभितांभोधिवर्णना १०७ प्रतीक्ष्यंतत्प्रतीक्ष्यायैपितृष्वस्रेप्रतिश्रुतं॥ सहिष्येश
तमागांसिसूनोस्तइतियत्त्वया १०८ तीक्ष्णानारुंतुदाबुद्धिःकर्मशांतंप्रताप
वत्॥ नोपतापिमनःसोष्मवागेकावाग्मिनःसतः १०९ स्वयंकृतप्रसादस्यत
स्याह्नोभानुमानिव॥ समयावधिमप्राप्यनांतायालंभवानपि ११० कृत्वाकृत्य
विदस्तीर्थेष्वंतःप्रणिधयःपदं॥ विदांकुर्वंतुमहतस्तलंविद्विषदंभसः १११ अनुत्सूत्र
पदन्यासासद्वृत्तिःसन्निबंधना॥ शब्दविद्येवनोभातिराजनीतिरपस्पशा ११२ अज्ञा
तदोषैर्दोषज्ञैरुद्दूष्योभयवेतनैः॥ भेद्याःशत्रोरभिव्यक्तशासनैःसामवायिकाः ११३
उपाधिवांसिकर्तारःपुरीमाजातशात्रवीं॥ राजन्यकान्युपायज्ञैरेकार्थानिचरैस्तव ११४

मा॰स॰२ सविशेषं सुते पांडोर्भक्तिं त्वयि वितन्वति ॥ वैरायितारस्तरला: स्वयं मत्सरिण: परे ११५
यदि हात्मविदो विपक्षमध्ये सह संवृद्धिभिरप्यजो पि भूभुजस्यु: ॥ बलिपुष्टकुलादिवा
१२ न्यपुष्टै: पृथगस्मादचिरेण भाविता ते: ११६ सहजचापलदोषसमुद्धतश्चलितदुर्ब
लपक्षपरिग्रह: ॥ तव दुरासदवीर्यविभावसौ शलभतां लभतामसुहृद्गुण: ११७
इति विशकलितार्थामौद्धवीं वाचमेनामनुगतनयमार्गामर्गलां दुर्नयस्य ॥ नरकरिपु
रुदस्थादुच्चकैरुग्रिनोर: स्खलनियतनिषण्णश्रीश्रुतां शुश्रुवांस: ११८ ॥ ॥
इति द्वितीय: सर्ग: समाप्त: ॥ ॥ ७ ॥ ॥
कौबेरदिग्भागमपास्य मार्गमागस्त्यमुष्णांशुरिवावतीर्ण: ॥ अपेतयुद्धाभिनिवेशसौ
म्यो हरिर्हरिप्रस्थमथ प्रतस्थे १ जगत्पवित्रैरपि तं न पादै: स्प्रष्टुं जगत्पूज्यमयुज्यतार्क: ॥
अतो ग्रहस्त्पार्वणचंद्रचारु तस्यातपत्रं बिभरांबभूवे २ मृणालसूत्रामलमन्तरेण स्थि
तश्चलच्चामरयोर्द्वयं स: ॥ भेजेऽभित: पातुकसिद्धसिंधोरभूतपूर्वां श्रियमंबुराशे: ३

चित्राभिरस्योपरि मौलिभाजां भाभिर्मणीनामनणीयसीभि: ॥ अनेकधातुच्छुरिता
श्मरश्मेर्गोवर्धनस्याकृतिरन्वकारि ४ तस्योल्लसत्काचनकुंडलाग्रप्रत्युप्तगारुत्मत
टकोटिभ्याघट्टनोभंजनयामणीनां ॥ बह्वीयसा दीप्तिवितानकेन चकासयामास तुरुल्लसंती
५ उभौ यदि व्योम्नि पृथक्प्रवाहावाकाशगंगापयस: पतेतां ॥ तेनोपमीयेत तमालनील
मामुक्तमुक्तालतमस्य वक्ष: ६ निसर्गरक्तैर्वलयावनद्धतनूज्ज्वलभ्मरश्मिपुरितैर्नखाग्रै: ॥
व्यद्योततात्याधापि करा विक्षोविक्षोभजास्त्रकृन्तपिनेरिवासौ ८ तेनाभसांसारमय:
पयोधेर्दधे मणिर्दीधितिदीपिताश: ॥ अनवेसनाविंबगतस्तदंगे साक्षादिवालक्ष्यत
तन्मिवोर्ध्वमुच्चैस्त्रिस्रोतस: संततधारमंभ: १० स इन्द्रनीलस्थलनीलमूर्तीरराजकर्चू
पिशंगवासा: ॥ विसृत्वरैरंबुरुहांरजोभिर्यमस्वसुश्चित्र इवोदभार: ११ श्रीरामकृष्ण॥

प्रसाधितस्याथमधुद्विषोभूदन्यैवलक्ष्मीरितियुक्तमेतत् ॥ वपुष्यशेषेखिललोककांता
सानन्यकांताप्युरसीतरातु १२ कपाटविस्तीर्णमनोरमोरः स्थलस्थितश्रीललनस्य

तस्य ॥ आनंदिताशेषजनाबभूवसर्वांगसंगिन्यपरेवलक्ष्मीः १३ देहस्याधिपत्रा
णमुषांनखानामुपेयुषांभूषणतांक्षतेन ॥ प्रकाशकार्कश्यगुणोदधानाःस्तनौतरुण्यःपरि
वभुरेनं १४ आकर्षतेवोर्ध्वमतिकृशीयानत्युन्नतत्वात्कुचमंडलेन ॥ नमामभध्योतिगु
रुत्वभाजानितांतमाक्रांतइवांगनानां १५ यांयांप्रियःप्रेक्षतकातराक्षीसासाह्रियानम्र
मुखीबभूव ॥ निःशंकमन्याःसममाहितेर्ष्यास्तत्रांतरेजघ्नुरमुंकटाक्षैः १६ तस्यात
सीसूनसमानभासोभ्राम्यन्मयूखावलिमंडलेन ॥ चक्रेणरेजेयमुनाजलोघःस्फुरन्म
हावर्तइवैकबाहुः १७ विरोधिनांविग्रहभेददक्षामूर्तेवशक्तिःक्वचिदस्खलंती ॥ नित्यं

हरेःसंनिहितानिकामंकौमोदकीमोदयतिस्मचेतः १८ नकेवलंयःस्वतयामुरारेरन
न्यसाधारणतांदधानः ॥ अस्पर्धमुद्वेजयितापरेषांनाम्नापितस्यैवसनंदकोभूत् १९

ननीतमन्येननतिंकदाचित्कर्णांतिकप्राप्तगुणंक्रियासु ॥ विधेयमस्याभवदंतिकस्थंशा
र्ङ्गंधनुर्मित्रमिवद्रढीयः २० प्रवृद्धमंद्राम्बुदधीरनादःकृष्णार्णवाभ्यर्णचरैकहंसः ॥
मंदानिलापूरकृतंदधानोनिध्वानमश्रूयतपांचजन्यः २१ रराजसंपादकमिष्टसिद्धेः
सर्वासुदिक्ष्वप्रतिघंप्रधमार्गं ॥ महारथःपुष्परथंरथांगीक्षिप्रंक्षपानाथइवाधिरूढः २२
ध्वजाग्रधामाददृशेथशौरेःसंक्रांतमूर्तिर्मणिमेदिनीषु ॥ कृणावतस्त्रासयितुंरसायाः
स्तलंविवक्षन्निवपन्नगारिः २३ पिबासनस्तस्यमहीद्रिरध्रैर्भिदापटीयान्पटहप्र
णादः ॥ जलांतराणीवमहार्णवौघःशब्दांतराण्यंतरयांचकार २४ यतःसमंतात्
जगतांजगामधर्माधारिण्याःफणिनास्तलोपः ॥ महाभराभुग्नशिराःसहस्रसहा

यकव्यग्रभुजंगसंधे २५ अथोच्चकैस्तोरणसंगभंगभयावनम्रीकृतकेतनानि ॥ क्रि
याफलानीवसुनीतिभाजंसैन्यानिसामान्वयमन्वयसुः ॥ २५८ रयामारुणैर्वारणदानतो
येरालोडिताःकांचनभूपरागाः ॥ आनेपिमग्नैर्भीतिकर्णापद्मेक्षोदद्युलम्बुक्षुद्रिरस्या
पेः २७

भा. स. ३ नलंघयामास महाजनानां शिरांसि नैवोध्धततिमाजगाम ॥ अचेष्टतास्यापरभूमिरे
णुः खुराहतो यत्सहरंगनेमिः ॥ २८ निरुध्यमानाप्यदुभिः कथंचिन्नदुर्यदुग्धिक्षि
पुरस्यपार्श्वो भुवंगुरुन्मार्गरुधः करींद्रानुल्लंघ्यगंतुं तुरगास्तदीषुः २९ अवेक्षितानाः
१४ यतनस्वमग्रे तुरंगिभिर्यत्नत्वनगृहीतयोद्धृः ॥ प्रक्रीडितान्रेणुभिरेस तूर्णं निन्युर्जनान्यः
पथुकान्यथिभ्यः ३० दिदृक्षमाणाः प्रतिरथ्यमीयुर्मुरारिमारादुनघंजनोघाः ॥ अनेक
शः संस्तुतमप्यनल्पानवंनवं प्रीतिरहो करोति ३१ उपेयुषोवर्त्मनि रंतराभिरसेनिरु
द्धासमनीकिनीभिः ॥ रथस्य तस्यां पुरि दत्तचक्षुर्विज्ञान्विदामास रान्नैर्नयांतं ३२ मध्यसमु
द्वं ककुभः पिशंगीर्याकुर्वतीकांचनवप्रभासा ॥ तुरंगकांतामुखनव्यवाहज्वालेनभिन्नाजलमु
ल्लुलास ३३ कृतास्पदाभूमिभृतां सहस्त्रैरुदन्वदंभः परिवीतमूर्तिः ॥ अनिर्विदायाविदधीव
धात्रापरापृथिव्याः प्रतियातनेव ३४ त्वष्टुः सदाभ्यासगृहीतशिल्पविज्ञानसंपत्प्रसर
स्यसीमा ॥ अदृश्यतादर्शतलामलेषु छायेव यास्त्वजलधेर्जलेषु ३५ श्रीरामजयरामजयराम

।

रथांगभर्त्रेभिनवं वराय यस्याः पितेव प्रतिपादितायाः ॥ प्रेम्णोपकंठं मुहुरंकभाजोर
त्नावलीरंबुधिराबबंध ३६ यस्यामलब्धहारिधिवारिवीचिच्छटोच्छलच्छंखकुलाकुले
न ॥ वप्रेण पर्यंतचरोडुचक्रः सुमेरुवप्रोन्वहमन्वकारि ३७ वणिक्पथे पूगकृता
नियत्र भ्रमागते रंबुभिरंबुराशिः ॥ लोलैरलोलद्युतिभाजि मुष्णन्रत्नानिर
त्नाकरतामवाप ३८ अभ्रंलिहास्तः कोमलरत्नराशीनपांनिधिः फेनपिनद्धभासः ॥
यत्रापदातुमिवाधितल्पं विस्तारयामासतरंगहस्तैः ३९ यच्छालमुत्तुंगतया विजेतुं
दूराद्दुरुल्लंघ्यतत्सागरस्य ॥ महोर्मिभिर्व्याहतवांछितार्थैर्व्रीडादिवाभ्युत्थितगतैर्वलिल्ये
४० कुतूहलेनेव जवादुपेत्य प्राकारभित्त्यासहसा निषिद्धः ॥ रसन्नरोदीदृशामंबुव
र्षव्याजेनयस्याबहिरंबुवाहः ४१ पदं गनानूपसरूपतायाः कविक्रुणभेदकमिच्छती
भिः ॥ आराधितो धाम नुरस्सरोभिश्चक्रेप्रजास्वाः सनिमेषचिह्नाः ४२ स्फुरत्तुषा
रांशुमरीचिजालैर्विनिह्नुताः स्फाटिकसौधपंक्तीः ॥ आरुह्य नार्यः क्षणदासु यस्यां

नभोगतादिव्यइवव्यराजन् ४३ कांतेंदुकांतोपलकुट्टिमेषुप्रतिक्षपंहर्म्यतलेषुय
त्र॥ उच्चैरधःपातिपयोमुचोपिसमूहमूकः पयसांप्रणाल्यः ४४ रत्नौघकियाय
१५ त्रनिशाम्यदीपान् जालागताभ्योधिगृहंगृहिण्यः॥ बिभ्युर्विडालेक्षणभीषणा
भ्योवैदूर्यकुड्येषुशशिद्युतिभ्यः ४५ यस्यामतिश्लक्ष्णतयागृहेषुविंधातुमा
लेख्यमशक्नुवंतः॥ चक्रुर्युवानःप्रतिबिंबितांगाःसजीवचित्राइवरत्नभि
त्तीः ४६ सावर्ण्यभाजांप्रतिमागतानांलक्ष्यैःस्मरापांडुतयांगनानां॥ यस्यांक
पोलैःकलधौतधामस्तंभेषुभेजेमणिदर्पणश्रीः ४७ शुकांगनीलोपलनिर्मि
तानांलिहेषुभासागृहदेहलीनां॥ यस्यामलिंदेषुनचक्रुरेवमुग्धांगनागोमयगो
मुखानि ४८ गोपानसीषुक्षणमास्थितानामालंबिभिश्चंद्रकिणांकलापैः॥ हरि
न्मणिश्याममतृणाभिरामैर्गृहाणिनीध्रैरिवयत्ररेजुः ४९
गृहद्वारशाखयोर्दीर्घभित्ति दानुबाहिर्भागेषु
अप्रकाशनडुव्याविशेष

उपरिस्थकाष्ठयदार्वाधारभूतस्तंभागूचीगानि
अग्रदुसा
विटंकापरनामानःस्तंभाग्रपसारितास्कविशेषाः
वहत्सुलेरप्यतुलैर्वितानमालापिनद्धैरपिचाविताने॥ रेजेविचित्रैरपियासचित्रैर्गृहैर्वि
शालैरपिभूरिशालैः ५० चिक्रंसयाकृत्रिमपत्रिपंक्तेःकपोतपालीषुनिकेतनानां॥
मार्जारमप्यायतनिश्चलांगंयस्यांजनःकृत्रिममेवमेने ५१ क्षितिप्रतिष्ठोपिमुखार
विंदैर्वधूजनश्चंद्रमधश्चकार॥ अतीतनक्षत्रपथानियत्रप्रासादशृंगाणिमृषाध्य
रुक्षन् ५२ रम्याइतिप्राप्तवतीःपताकारागंविविक्ताइतिवर्धयंतीः॥ यस्यामसेवं
तनमद्वलीकाःसमंवधूभिर्वलभीर्युवानः ५३ स्वगंधितामृप्रतिथत्वपूर्वांबिभ्रं
तियत्रप्रमदायपुंसां॥ मधूनिवक्त्राणिचकामिनीनामामोदकर्मव्यतिहारमीयुः
 ५४ रतांतरेयत्रगृहांतरेषुवितर्दिनिर्यूहविटंकनीडः॥ रुतानिशृण्वन्वयसांगणोंतेवासि
त्वमापस्फुटमंगनानां ५५ घनोपपिस्पष्टतरेषुयत्रस्वच्छासिनारीकुचमंडलेषु॥ आ
काशसाम्यंदधुरंबराणिनश्नामतःकेवलमर्थतोपि ५६ यस्यामजिह्मामहतीमपं
काःसीमानमत्यायतयोत्यजंतः॥ जनैरजातस्खलनैर्नजातुद्वयेप्यमुच्यंतविनीत
मार्गाः ५७

मा-स-३ परस्परस्पर्धिपरार्ध्यरूपाः पौरस्त्रियो यत्र विधाय वेधाः ॥ श्रीनिर्मितिप्राप्तघुणक्षतैक
वर्णोपमावाच्यमलं ममार्ज ५८ क्षुण्णं यदंतःकरणेन वृक्षाः फलंति कल्पोपपदास्त
देव ॥ अध्यूषुषो यामभवज्जनस्य याः संपदस्ता मनसोप्यभूमिः ५९ कृखादृधा
१६ नेंदुसकलाः स्वभाभिरुद्भासयन्तो धसिताभिराशाः ॥ यां रेवतीजानिरियेष हातुं न रोहि
णेयो न च रोहिणीशः ६० बाणाह्वव्याहतशंभुशक्तेरासत्तिमासाद्य जनार्दनस्य ॥ श
रीरिणा जैत्रशरेण यत्र निःशंकमूषे मकरध्वजेन ६१ निषेव्यमाणेन शिवैर्मरुद्भिर
ध्यास्यमाना हरिणा चिराय ॥ उद्रश्मिरत्नांकुरधाम्नि सिंधावाह्नस्त मेरावमरावती
या ६२ स्निग्धांजनश्यामरुचिस्सुवृत्तो वध्वा इवाध्वंसितवर्णकांतेः ॥ विशेषको वा विशि
शेष यस्याः श्रियं त्रिलोकीतिलकः स एव ६३ तामीक्षमाणः स पुरं पुरस्तात्प्रापत्प्र
तोलीमतुलप्रतापः ॥ वज्रप्रभोद्भासिसुरायुधश्रीर्या देवसेनेव परैरलंघ्या ६४ प्रजा
द्वारागादरविंदनाभेः शंभोर्जटाजूटतटादिवापः ॥ मुखादिवाथ श्रुतयो विधातुः पु
रान्निरीयुर्मधुजिद्ध्वजिन्यः ६५

श्लिष्यद्भिरन्योन्यमुखाग्रसंगस्खलत्खलीनं हरिभिर्विलोलैः ॥ परस्परोत्पीडितजानुभा
गा दुःखेन निश्चक्रमुरश्ववाहाः ६६ निरंतरालेपि विमुच्यमाने दूरं पथि प्राणभृतां गणे
न ॥ तेजोमहद्भिः स्तमसेव दीपैर्द्विपैरसंबाधमयांबभूवे ६७ शनैरनीयंत रयात्पतंतो
रथाः क्षितिं हस्तिनखादखेदैः ॥ सयत्नसूतायतरश्मिभुग्नग्रीवाग्रसंसक्तयुगैस्तुर
गैः ६८ बलोर्मिभिस्तत्क्षणहीयमानरथ्याभुजाया वलयैरिवास्याः ॥ प्रायेण निष्क्रा
मति चक्रपाणौ नेष्टं पुरो द्वारवतीत्वमासीत् ६९ पारेजलं नीरनिधेरपश्यन्मुरारि
रानीलपलाशराशीः ॥ वनावलीरुत्कलिकासहस्रप्रतिक्षणोत्कूलितशैवलाभाः ७० ल
क्ष्मीभृतोंभोधितटाधिवासान्द्रुमान्ससोनीरदनीलभासः ॥ लतावधूसंप्रयुजोधिवेलं ब
हूकृतान्स्वानिव पश्यति स्म ७१ आश्लिष्टभूमिं रसितारमुच्चैर्लोलद्भुजाकारबृहत्तरंगं ॥ फे
नायमानं पतिमापगानामसावपस्मारिणमाशशंके ७२ पीत्वा जलानां निधिनातिगार्ध्या
द्वृद्धिं गतेप्यात्मनि नैव मांतीः ॥ क्षिप्ता इवेंदोः स्वरुचोधितीरं मुक्तावलीराकलयांचकार ७३
ला

मा०स ३ साटोपमुर्वीमनिशं नदंतो यैः प्लावयिष्यंति समंततोमी ॥ तान्येकदेशान्निभृतं पयो
धेः सोंभांसि मेघान्पिबतो ददर्श ७४ उद्धत्य मेघैस्ततएव तोयमर्थं मुनींद्रैरिव
१७ संप्रणीताः ॥ अलोकयामास हरिः पतंतीर्नदीः स्मृतीर्वेदमिवांबुराशिं ७५ विक्री
यदिश्यानि धनान्युरूणि द्वैप्यानसावुत्तमलाभभाजः ॥ तरीषु तत्रत्यमफल्गु भांडं
सांयात्रिकानावपतोभ्यनंदत् ७६ उत्पित्सवोंतर्नदभर्तुरुच्चैर्गरीयसा निःश्वसि
तानिलेन ॥ पयांसि भक्त्या गरुडध्वजस्य ध्वजानिवोच्चिक्षिपिरे फणींद्राः ७७ त
मागतं वीक्ष्य युगांतबंधुमुत्संगशय्याशयमंबुराशिः ॥ प्रत्युज्जगामेव गुरुप्रमोद
प्रसारितोत्तुंगतरंगबाहुः ७८ उत्संगितांभः कणको नभस्वानुदन्वतः स्वेदलवा राम
न्ममार्ज ॥ तस्याधिवेलं व्रजतोनुवेलमेलावनास्फालनलब्धगंधः ७९ उत्तालता
लीवनसंप्रवृत्तसमीरसीमंतितकेतकीकाः ॥ आसेदिरे लावणसैंधवीनां चमूचरैः १७
कच्छभुवां प्रदेशाः ८० कीः

वेलाकालेच जलधेर्वेलातीरविक्रियोरितिविश्वः
जलप्रायेनूपस्यात्पुंसि कच्छस्तथाविधे समरः

निमज्जितां

लवंगमालाकलितावतंसास्ते नालिकेरांतरपः पिबंतः ॥ आस्वादितार्द्रक्रमुकाः समुद्रा
दभ्यागतस्य प्रतिपत्तिमीयुः ८१ तुरगशताकुलस्य परितः परमेकतुरंगजन्मनः प्रमथित
भूभृतः प्रतिपथं मथितस्य भृशं महीभृता ॥ परिचरतो बलानुजबलस्य पुरः सततं धृ
तश्रियश्चिरविगतश्रियो जलनिधेश्च तदाभवदंतरं महत् ८२ इति तृतीयः सर्गः ॥
॥६७॥ ॥श्री ३ निश्वासधूमं सह रत्नभाभिर्भित्वोत्थितं भूमिमिवोरगाणां ॥ मि
नीलोपलस्यूतविचित्रधातुमसौ गिरिं रैवतकं ददर्श १ गुर्वीरजस्रं दृषदः समंता
दुपर्युपर्यंबुमुचां वितानैः ॥ विंध्यायमानं दिवसस्य भर्तुर्मार्गं पुनारोद्धुमिवोन्नमद्भिः २
क्रांतं रुचा कांचनवप्रभाजा नवप्रभाजालभृतां मणीनां ॥ श्रितं शिलाश्यामलता
भिरामं लताभिरामं त्रितषट्पदाभिः ३ सहस्रसंख्यैर्गगनं शिरोभिः पादैर्भुवं व्याप्य वि मेलं तपंक्ते
तिष्ठमानं ॥ विलोचनस्थानगतोष्णरश्मिनिशाकरं साधुहिरण्यगर्भं ४ क्वचिज्जलापा
यविपांडुराणि धौतोत्तरीयप्रतिमच्छवीनि ॥ अभ्राणि बिभ्राणमुमांगसंगविभक्तभस्मान
मिव स्मरारिं ५

५ पाषाणप्रस्तरग्रावोपलाश्मानः शिलादृषदित्यमरः

अंसप्रकांड्या: स्कंधप्रतीकिर: उत्पलपल्लव नमोक्ता इति विश्व: ४ अलकाः पर्णकुंतलाः स्तुमर: ९

मा.स.४ छायांनिजस्त्रीचटुलालसानांमदेनकिंचिच्चटुलालसानां॥कुर्वाणमुत्पिंजलजातपत्रैर्वि
हंगमानांजलजातपत्रै: ६ स्कंधाधिरूढोज्वलनीलकंठानुर्वीरुह: श्लिष्टतनूनहींद्रै:॥
१८ प्रनर्तितानेकलताभुजाग्रान्रुद्राननेकानिवधारयंतं ७ विलंबिनीलोत्पलकर्णपूरा:
कपोलभित्तीरिवलोध्रगौरी:॥नवोलपालंकृतसैकताभा: शुचीरप: शैवलिनीर्दधानं ८
राजीवराजीवशलोलभृंगंमुष्णंतमुष्णंततिभिस्तरूणां॥कांतालकांताललना:सुरा
णांरक्षोभिरक्षोभितमुद्वहंतं ९॥ ॥कुलकं॥ ॥मुदेमुरारेरमरै:सुमेरोरानीयय
स्योपचितस्यशृंगै:॥भवंतिनोद्दामगिरांकवीनामुच्छ्रायसौंदर्यगुणामृषोद्या: १०
यतोपराध्योनिभृतान्यनूनै: प्रस्थैर्मुहु र्भूरिभिरुच्छिखानि॥आढ्यादिवप्रापणिका
दजस्रंजग्राहरत्नान्यमितानिलोक: ११ अविद्यतासन्नमुदग्रतापंरविंदधानेपर
विंदधाने॥भृंगावलिर्यस्यतटेनिपीतरसानमत्तामरसानमत्ता १२ यत्राधिरूढेनम
हीरुहोच्चैरुन्निद्रपुष्पाक्षिसहस्रभाजा॥सुराधिपाधिष्ठितहस्तिमल्ललीलांदधौराजतगंड

लोलुपोलोलुभोजोलोलंपटोलालसोपिचेतियादव: २ पण्याजीवा: आपणि कैरहानैगमाश्चयेपाणिजइतिविश्व: ती
जरठस्त्रीसानुमानयोरित्यमर: ४

गौरश्वेतोरषभेरश्मौवज्रेचंद्रमसिस्मृत:॥ अर्जुनेनैकवर्णे स्याद्वाणभे गवारिषुगोर्मत इति विश्व: ६

विभिन्नवर्णागरुडाग्रजेनसूर्यस्यरथ्या: परित:स्फुरंत्या॥रत्नै:पुनर्यत्ररुचारुचंस्वामानिन्यिरेवं
शाकरीरनिले: १४ यत्रोज्झितनाभिर्मुहुरंबुवाहै: समुन्नमद्भिर्नसमुन्नमद्भि:॥वनंबबाधेवि
षपावकोत्थाविपन्नगानामविपन्नगानां १५ फलद्भिरुष्णांशुकराभिमर्शात्काशानवं धाम
पतंगकांते:॥शशांसय:पात्रगुणाद्गुणानांसंक्रांतिमाक्रांतगुणातिरेकां १६ दृष्टोपिशैल:
समुहुर्मुरारेरपूर्ववद्विस्मयमाततान॥क्षणेक्षणेयन्नवतामुपैतितदेवरूपंरमणीय
ताया: १७ उच्चारणज्ञोथगिरांदधानमुच्चारणत्पक्षिगणास्तटीस्तं॥उत्कंधरंद्रष्टुम
वेक्ष्यशौरिमुत्कंधरंदारुकइत्युवाच १८ आच्छादितायतदिगंबरमुच्चकैर्गामाक्रम्यसंस्थितमु
दग्रविशालशृंगं॥मूर्ध्निस्खलत्तुहिनदीधितिकोटिमेनमुद्वीक्ष्यकोभुविनविस्मयतेगिरीशं १९
उदयतिविततोर्ध्वरश्मिरज्जावहिमरुचौहिमधाम्नियातिचास्तं॥वहतिगिरिरयंविलं
बिघंटाद्वयपरिवारितवारणेंद्रलीलां २० वहतिय: परित: कनकस्थली: सहरिताल समान
नवांशुक:॥अचलएषभवानिवराजतेसहरितालसमाननवांशुक: २१ पार्श्वाप्सुभागमि
हसानुषुसन्निषण्णा: पश्यंति शांतमलसांद्रतरांशुजालं॥संपूर्णलब्धललनालप
नोपमानमुत्संगसंगिहरिणस्यमृगांकमूर्ते: २२ हरितेतिचदूर्वायांहरिद्रूर्णपुतेन्यवदितिविश्व: ३

२ जगती भुवने भूमौ इति। ... ततोभ्युः इत्यमरः। प्रवाहो निर्झरो झरः इत्यमरः। रतिरंगं न प्रहारस्तु गतः परिणतो मतङ्गः ह

मा. स. ४ कृत्वा पुंवत्पातमुच्चैर्भृगुभ्यो मूर्ध्नि ग्राव्णां जर्जरा निर्झरौघाः। कुर्वंति द्यामुत्पतंतः स्मरार्तस्वर्लोक
स्त्रीगात्रनिर्वाणमत्र २३ स्थगयंति अमूः शमितचातकार्तस्वरा जलदास्तडित्तुलितकां
तकार्तस्वराः। जगतीरिह स्फुरितचारुचामीकराः सवितुः क्वचित्कपिशयंति चामीक
१८ राः २४ उत्क्षिप्तमुच्छ्रितसितांशुकरावलंबैरुत्तंभितोडुभिरतीवतरां शिरोभिः। श्रद्धे
यनिर्झरजलव्यपदेशमस्य विष्वक्तटेषु पतति स्फुटमंतरिक्षं २५ एकत्र स्फटिकतटां
शुभिन्ननीरा नीलाश्मद्युतिभिदुरांभसोपरत्र। कालिंदीजलजनितश्रियः श्रयंते वै
दग्धीमिह सरितः सुरापगायाः २६ इतस्ततोस्मिन्विलसंति मेरोः समानवप्रे मणिसा
नुरागाः। स्त्रियश्च पत्यौ सुरसुंदरीभिः समा नु वप्रे मणिसानुरागाः २७ उच्चैर्महार
जतराजिविराजितासौ दुर्वर्णभित्तिरिह सांद्रसुधासवर्णा। अभ्येति भस्मपरिपांडरि
तस्मरारेर्वह्निक्षिलोचनललामललाटलीलां २८ अयमतिजरठाः प्रकामगुर्वीरल
घुविलंबिपयोधरोपरुद्धाः। सततमसुमतामगम्यरूपाः परिणतदिक्करिकास्तटी
र्बिभर्ति २९ धूमाकारं दधति पुरः सौवर्णे वर्णेनाग्नेः सदृशि तटे पश्यामि। श्यामी

दुर्वर्णं रजतं रूप्यं महारजतकांचनमित्यमरः। कालिंदी सूर्यतनया यमुना शमनस्वसेत्यमरः। जरठः कठिने जीर्णे इति ...

भृंगा इव षट्पदकल भेद इति वैजयंती

भूताः कुसुमसमूहे लीनां लीनामालीनिह तरवो बिभ्राणाः ३० व्योमस्पृशः प्रथ
यता कलधौतभित्तीरुन्निद्रपुष्पचणचंपकपिंगभासः। सौमेरवीमधिगतेन नि
तंबशोभामेतेन भारतमिलावृतवद्विभाति ३१ रुचिरचित्रतनूरुहशालिभिः प्रचलि
तैः परितः प्रियकव्रजैः। विविधरत्नमयैरभिभात्यसावयवैरिव जंगमतां गतैः ३२
कुशेशयैरत्र जलाशयोषिता मुदा रमंते कलभा विकस्वरैः। प्रगीयते सिद्धग
णैश्च योषिता मुदारमंते कलभाविकस्वरैः ३३ आसादितस्य तमसा नियतेर्नियोगा
दाकांक्षतः पुनरपक्रमणेन कालं। पत्युस्त्विषामिह महौषधयः कलत्रस्थानं परैरप
रिभूतममूर्भजंते ३४ वनस्पतिस्कंधनिषण्णबालप्रवालहस्ताः प्रमदा इवात्र। पुष्पेक्ष
णैर्लंभितलोचकैर्वा मधुव्रतव्रातवृतैर्व्रतत्यः ३५ विहगाः कदंबसुरभाविह गाः कल
यंत्यनुक्षणमनेकलयं। भ्रमयन्नुपैति मुहुरभ्रमयं पवनश्च धूतनवनीपवनः ३६

६ कटकं वलये सानौ इति विश्वः   इतो निकुंजे दशनेनि विश्वः ५ मेखलकररबद्धकांचं...
७ अभिरूर्ध्वमधित्यका इत्यमरः

मा०स ४ विहङ्गिरागमपरैर्विवृतं कथंचिच्छ्रुत्वापि दुर्ग्रहमनिश्चितधीभिरन्यैः ॥ श्रेयान्द्विजातिरिव
हंतुमघानि दक्षं गूढार्थमेष निधिमंत्रगणं बिभर्ति ३७ बिंबोष्ठं बहु मनुते तुरंगवक्त्रश्चुंबंतं
२० मुखमिह किन्नरं प्रियायाः ॥ श्लिष्यंतं मुहुरितरोपि तं निजस्त्रीमुत्तुंगस्तनभरभंगभीरु
मध्यां ३८ यदेतदस्यानुतटं विभाति वनं ततानेकतमालतालं ॥ न पुष्पितात्र स्थगिता
करश्मावनं ततानेकतमालतालं ३९ इतो ज्वलासु विमलोपलमेखलांताः सद्रत्न
चित्रकटकासु बृहन्नितंबाः ॥ अस्मिन्भजंति घनकोमलगंडशैला नार्योनुरूपमधिवा
समधित्यकासु ४० आनतिचिरोज्झितस्य जलदेन चिरस्थितबहुबुद्बुदस्य पयसोनुकृ
तिं ॥ विरलविकीर्णवज्रशकला सकलामिह विदधाति धौतकलधौतमही ४१ वर्जयंत्या
जनैः संगमेकांततः स्तर्कयंत्यासुखं संगमेकांततः योषयैष स्मरासंन्नतापांगया सेव्य
तेनकयासन्नतापांगया ४२ संकीर्णकीचकवनस्खलितैकवालविच्छेदकातरधि
यश्चलितुं चमर्यः ॥ अस्मिन्मृदुश्वसनगर्भतदीयरंध्रनिर्यत्स्वरश्रुतिसुखा इव

निर्तंबोरोधसि स्कंधे शिखरेपि कटकेपरः इति विश्वः ६   २ श्रीयोषद्वनिता योषा नारी सीमंतिनी वधूरित्यमरः

घ अभ्यासिपुत्रिका चपुरिका चासिधेनुका इत्यमरः ३   नालिका कालक्री तकिको इत्यमरः २
गरुडस्तिर्यः

नोत्सहंते ४३ मुक्तं मुक्तागौरमिह क्षीरमिवाभ्रैर्वापीष्वंतर्लीनमहानीलदलासु ॥
शस्त्रीश्यामैरंशुभिराशु द्रुतमंभश्छायामच्छामृच्छति नीलीसलिलस्य ४४ या न ययौ
प्रियमन्यवधूभ्यः सारतरागमनायतमानं ॥ तेन सहेह बिभर्ति रहः स्त्री सा रतरागमना
यतमानं ४५ भिन्नेषु रत्नकिरणैः किरणेष्विहेंदोरुच्चावचैरुपगतेषु सहस्रसंख्यां ॥ दो
षापि नूनमहिमांशुरसौ किलेति व्याकोशकोकनदतां दधते नलिन्यः ४६ अपशंकम
कपरिवर्तनोचिताश्चलिताः पुरःपतिमुपैतुमात्मजाः ॥ अनुरोदितीव करुणेन पत्रिणां
विरुतेन वत्सलतयैष निम्नगाः ४७ मधुकरविटपानमितास्तरुपंक्तीर्बिभ्रतोस्य
विटपानमिताः ॥ परिपाकपिशंगलतारजसा रोधश्चकास्ति कपिशंगलता ४८ आभ्रा
गतः पतदिह हरमुपत्यकासु शृंगारितायतमहेभकराभमंभः ॥ संलक्ष्यते विविधरत्न
करानुविद्ध ऊर्ध्वप्रसारितसुराधिपचापचारु ४९ दधति च विकसद्विचित्रकल्पद्रुम
कुसुमैरभिगुंफितानि वेताः ॥ क्षणमलघुविलंबिपिच्छदाम्नः शिखरशिखाः शिखि
शेखरानमुष्य ५०   शिखावलः शिखी केकी शिखा स्वापीड शेखरावित्यमरः ८ शिखा चूडा केशपाशी इत्यम
नलभ्य नलं तरणात्तरणमिति शिराश्वेतः ९   भातोसंभावनयोः किलेत्यमरः ८ याकोशो विकचस्फुटः इत्यमरः ९

विटपः पल्लवे स्कंधे विस्तारे स्तंबशाखयोः इति विश्वः ८ स्वासो भीमाजिह्वे धूपयति श्वि पातवेले कपोतस्यादिति विश्वः २
पंकेरुहतामरसमित्यमरः २

मा.स.४ सत्रभूकाः सुखिनो स्मिन्ननवरतममंदरागतामरसदृशः ।। नासेवंते रसवन्ननवरतममंद
रागतामरसदृशः ५१ आछाद्य पुष्पपटमेषमहांतमंतरावर्तिभिर्गृहकपोतशिरोधराभैः ।।
२१ स्वांगानि धूमरुचिमागुरवं दधानैर्धूपायतीव पटलैर्नवनीरदानां ५२ अन्योन्यव्यति
करचारुभिर्विचित्रैरत्रस्यन्नवमणिजन्मभिर्मयूखैः ।। विस्मेरान्गगनसदः करोत्यमुष्मि
न्नाकाशे रचितमभित्ति चित्रकर्म ५३ समीरशिशिरः शिरः सुवसतां सतां जवनिका
निकामसुखिनां ।। बिभर्ति जनयन्नयं मुदमपामपायधवला बलाहकततीः ५४ मै
त्र्यादि चित्तपरिकर्मविदो विधाय क्लेशप्रहाणमिह लब्धसबीजयोगाः ।। ख्यातिं च सत्वपुरु
षान्यतयाधिगम्य वांछंति तामपि समाधिभृतो निरोद्धुं ५५ मरकतमयमेदिनीषु भानोस्तरु
न विटपांतरपातिनो मयूखाः ।। अवनतशितिकंठकंठलक्ष्मीमिह दधति स्फुरिताणुरेणुजा
लाः ५६ या बिभर्ति कलवल्लकीगुणस्वानमानमतिकालिमालया ।। नत्रकांतमुपगीत
या तया स्वानमानमतिकालिमालया ५७ सायं शशांककिरणाहतचंद्रकांतनिष्यंद
नीरनिकरेण कृताभिषेकाः ।।

२ नवोजादिनिवेगस्यात विषयस्यादिंद्रियार्थे देशे जनपदेपि चेति विश्वः ५ कलभः करिशावकः समरः २
इति विश्वः

अर्कोपलोल्लसितवह्निभिरह्निदीप्तास्तीव्रं महाव्रतमिवात्र चरंति वप्राः ५८ एतस्मिन्नधिकप
यः श्रियं वहंत्यः संक्षोभं पवनभुवा जवेन नीताः ।। वाल्मीकेररहितरामलक्ष्मणानां साधर्म्यं
दधति गिरां महासरस्यः ५९ इह मुहुर्मुदितैः कलभैरवः प्रतिदिशं क्रियते कलभैरवः ।।
स्फुरति चानुवनं चमरीचयः कनकरत्नभुवां च मरीचयः ६० त्वक्सारंध्रपरिपूरणल
ब्धगीतिरस्मिन्नसौ मृदितपक्ष्मलरल्लकांगः ।। कस्तूरिकामृगविमर्दसुगंधिरेति रागीव
सक्तिमधिकां विषयेषु वायुः ६१ प्रीत्यै यूनां व्यवहिततपनाः प्रौढध्वांतं दिनमिह जेदाः ।। दो नाः ल
षामन्यं विदधति सुरतक्रीडायासश्रमशमपटवः ६२ भग्नो निवासोयमिहास्य पुष्पैः सदा
नतोयेन विषाणिनागः ।। तीव्राणि तेनोच्छ्रितकोपितोसौ सदानतोयेन विषाणिना
गः ६३ आलयश्शीतमचलेश्वरमीश्वरोपि सांद्रेभचर्मवसनावरणोधिशेते ।। सर्वर्तुनि
र्वृतिकरे निवसन्नुपैति न द्वंद्वदुःखमिह किंचिदकिंचनोपि ६४ नवनगवनलेखाश्या
मध्याभिराभिः स्फटिककटकभूमिर्नाटयत्येष शैलः ।। अहिपरिकरभाजो भास्मनैरंग

प्रगाढगात्रिकाबंधे विविकारंभयोरपि इति विश्वः ९ वंशो त्वक्सार कर्मार त्वचिसार तृणध्वजा इत्यमरः ६
रल्लकः कंबलमृगे कंबले परिकीर्तितः इति वैजयंती ७

मा.स.४ रागैरधिगतैर्वलिम्नः शूलपाणेरभिख्यां ६५ दधद्भिरभितस्तटौ विकचवारिजांबुनदैर्वि
नोदितदिनक्लमाः कृतरुचश्च जांबुनदैः॥ निषेव्यमधुमाधवाः सरसमत्र कादंबरं हरंतिरतये
२२ रहः प्रियतमांगकादंबरं ६६ दर्पणनिर्मलासु पतिते घनतिमिरमुषिज्योतिषिरौप्यभि
त्तिषु पुरः प्रतिफलति मुहुः॥ व्रीडमसंमुखोपि रमणैरपहृतवसनाः कांचनकंदरासुत
रुणीरिह नयति रविः ६७ अनुकृतशिखरौघश्रीभिरभ्यागतोसौ त्वयि सरभसमभ्युत्ति
ष्ठतीवाद्रिरुच्चैः॥ द्रुतमरुदुपनुन्नैरुन्नमद्भिः सहेलं हलधरपरिधानश्यामलैरंबु
वाहैः ६८ ॥ ॥ ४ ॥ इति माघकाव्ये चतुर्थः सर्गः ॥ ॥ ४ ॥ ॥ ॥

रामचंद्रज पोथि आहे